7102

1. Title Bhāgavata Purāṇa Tīkā, Caturtha Skandha
2. Accession No. 5557
3. Folio No./Pages 95
4. Lines 14-18
5. Size 37 × 22Cm
6. Substance Paper
7. Script Devānagarī
8. Language Sanskṛit
9. Period Not mentioned
10. Beginning "ओम् श्रीगणेशाय नमः ।। ओम् अथैक त्रिंशताध्यायै विसर्गस्तुयईर्षत विसर्ग स्त्वीश्च रायी नैर्नह्म मत्वादिभिः कृतः"
11. End "इति श्री भागवते चतुर्थ स्कन्धे प्रम्चेत सोपाख्यानं नामैक त्रिंशोध्यायः ।।"
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Purāṇa
16. Revisor No
17. Author Sahsra Deva
18. Remarks Pages are with four-sided margin, partly damaged by termite, but text is readable. Pages are not in order, bound.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

003557

Diamond Book Binding House
Moh Karachi B.H.E.L Road Jawalapur

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुस्तकालय
गुरुकुल कांगड़ी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005557

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री-
भाच-
री-
२

ॐ श्रीगणेशाय नमः ॥ ॥ ॥ ॐ अथैकविंशाध्यायेविसर्गस्त्वयईर्षित ॥ विसर्गस्त्वीप्सयाधीनैर्ब्रह्मसन्वादिभिः कृतः
तत्रतत्प्रथमेध्यायेमनुकन्यान्वयः पृथक् ॥ वर्णितेयत्रयज्ञादिवृत्तिभिः प्रभवोहरेः ॥ मनुकन्यान्वयंविस्तरेणावा
क्रमाह ॥ मनोस्तितिचकाराद्वौपुत्रौच ॥ उत्तानपादादिमतोपिपुत्रनामः सूचितः ॥ तद्वर्णयितुमाह पुत्रिकाधर्ममाश्रि
मेति ॥ अभ्रातृकाप्रदास्यामितुभ्यांकन्यामलंकृतां ॥ अस्यांयोजायतेपुत्रः ॥ ममेपुत्रोभवेदितिभाषावंधेनकन्याद

श्रीमैत्रेयउवाच ॥ मनोस्तुशतरूपायांतिस्रः कन्याश्चजज्ञिरे ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुता ॥ २
आकूतिरुचयेप्रादादपिभ्रातरमौत्तानपादः ॥ पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः ॥ ३ ॥ प्रजापतिः सभगा
वान्रुचिस्तस्यामजीजनत् ॥ मिथुनंब्रह्मतेजसीपरमेणसमाधिना ॥ ४ ॥ यस्तयोः पुरुषः साक्षाद्विष्णु
र्यज्ञस्वरूपधृक् ॥ यास्त्रीसादक्षिणाभूतेरंशभूतानपायिनी ॥ ५ ॥ आतिथेयगृहेपुत्राः पुत्रेवित
नरोचिषि ॥ स्वायंभुवोमुदायुक्तोरुचिर्जग्राहदक्षिणां ॥ ६ ॥ तांकामयानांभगवा
नुवाहयज्ञषंपतिः ॥ तुष्टायांतोषमापन्नोजनयद्द्वादशात्मजान् ॥ ८
तोषःप्रतोषःसंतोषोभद्रःशांतिरिडस्पतिः ॥ इध्मः कवि
र्विभुःस्वह्नःसुदेवोरोचनोद्विषट् ॥ ७ ॥

नंपुत्रिकाधर्मः सचाभ्रातृकादौपुत्रार्थिनएवप्रसिद्धः ॥ तथापिपुत्रकामः ॥ तथाहुतवानित्याह ॥ भ्रातृमती
मपीति ॥ २ ॥ मिथुनंपुरुषंस्त्रियंचसमाधिनाईश्वरस्यध्यानेन ॥ ३ ॥ भूतेर्लक्ष्मा अंशभूता अस्तयेदंरोहंप
रिरुद्धइतिभावः ॥ पुत्राः आकूतिः पुत्रेयज्ञे ॥ ४ ॥ ५ ॥ ८ ॥ यज्ञषायज्ञानांमंत्राणांवापतिर्विष्णुः ॥ विभुषट्
द्वादश ॥ ७ ॥ १ ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह ॥ तुषिता इति द्वाभ्यां ॥ मन्वंतरं मनुर्देवाः मनुपुत्राः सुरेश्वराः ॥ ऋषयो पा
वतारास्त्रहरेषड्विधमुच्यते इति वदंति ॥ तत्र स्वायंभुवो मनुः ॥ तुषिता देवाः मरीचिप्रमुखाः सप्तर्षयः ॥ यज्ञहरो
वतारः ॥ स एव सुरगणेश्वरः इंद्रः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपादौ मनुपुत्रौ पृथ्वीपालकौ तदेवं यज्ञस्य हरेरुत्पत्ति
वर्द्धितं ॥ तयोः पुत्रपौत्रनप्तृणां वंशैरनुवृत्तं व्याप्तं पालितं तन्मन्वंतरं ॥ ९ ॥ अतः प्रायं बाहुल्येन कृते तत्कालार्थं

तुषितानामतेदेवा आसन्स्वायंभुवांतरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्ता
नपादौ मनुपुत्रौ महौजसौ ॥ तत्पुत्रपौत्रनप्तॄणां मनुवृत्तं तदंतरं ॥ ९ ॥ देवहूतिं सदा ज्ञात्वा कर्दमात्मजां
मनुः ॥ तत्संवेधि ऋतप्रायं भवतागदतो मम ॥ १० ॥ दत्वा ब्रह्मसुताय प्रसूतिं भगवान्मनुः ॥ प्रायश्च
त्कृतः सर्वत्रिलोक्यां विजितो महान् ॥ ११ ॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूति
प्रसवं प्रोच्यमानं निबोधमे ॥ १२ ॥ पत्नी मरीचेः स्तु कला सुषुवे कर्दमात्मजा कश्यपं पूर्णिमा चाथ
योगाद्धरितं जगत् ॥ १३ ॥ पूर्णिमासूत विरजं विश्वगं चापरं तप ॥ देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्धि
वः ॥ १४ ॥ अत्रेः पत्नी अनसूया त्रीन्जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वासमं सोममात्मेशब्रह्मसंभवा
न् ॥ १५ ॥ श्रीविष्णुरः अत्रेर्गृहे सुरश्रेष्ठाः स्थितस्य स्यात्तदेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मेऽ

गो १५

शातांऋतत्वात्प्रायग्रहणं ॥ ७ ॥ प्रसूतिप्रसवपुत्रपौत्रादिविस्तारं ॥ ११ ॥ यथोर्वंशोनाहरितं ॥ १३ ॥ कश्यप
स्य वंशं षष्ठे वक्ष्यति ॥ द्वितीयस्य वंशः माह ॥ पूर्णिमेति ॥ देवकुल्यां नामकन्यां च हरेः पादक्षालनाज्जन्मांत
रे यादिवः सरिद्गंगा भूतवती ॥ १४ ॥ आत्मेशब्रह्मसंभवान् ॥ विष्णुरुद्रब्रह्मणां मंशः संभूतान् ॥ १५ ॥ किंचित किं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कदंबनामकुलाद्रिंतपसिस्थितः सन् ॥ १७ ॥ तस्मिन्कुलाद्रौ प्रसृतानां स्तवकाद्यैः पलाशशोकेषु तेषां कानने ॥
निर्विघ्नानामनवदीतस्याः स्तवद्भिः वाभिरुद्धुष्टनादिति ॥ १८ ॥ प्राणायामपरैर्वायुः संदीपकायस्य तेन मुनेर्मूर्ध्नो
निर्गतेनाग्निना तप्यमानं समीरयतदाश्रमपदं परितस्तयः ॥ २१ ॥ अप्सरः प्रमुखैर्वितायमाने विस्तार्यमाणा ।

मैत्रेय उवाच ॥ ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदांवरः ॥ सहपत्न्या ययावृक्षकुलाद्रिं तपसि स्थितः ॥ १७
तस्मिन्प्रसूतस्तवकपलाशाशोककानने ॥ वाभिः स्तवद्भिरुद्धुष्टनिर्विघ्नायासमागतः ॥ १८ ॥ प्राणा
यामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वंद्वो निलभोजनः ॥ १९ ॥ शरणं तं प्रपेदेऽयं ए ५३
मां वजगदीश्वरः ॥ प्रजा मात्मसमं मह्यं प्रयच्छेति चिंतयन् ॥ २० ॥ तप्यमाने त्रिभुवनं प्राणायामेधसाग्नि
ना ॥ निर्गतेन मुनेर्मूर्ध्नः समीरप्रभवं स्तयः ॥ २१ ॥ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमान
यशसस्तदाश्रमपदं ययुः ॥ २२ ॥ तत्प्राक्तनभवसंयोगाविद्योतितमनामुनिः ॥ उत्थितैकपादेनदृष्ट
शेतिवृद्धयर्षभान् ॥ २३ ॥ प्रणम्य दंडवद्भूमावुपतस्थे हृतांजलिः ॥ वृषहंससुपर्णस्थान्स्वैः स्वैः चिह्नै
श्चिह्नितान् ॥ २४ ॥ कृपावलोकेन हसद्वदनेनोपलंभितान् ॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षि
णी ॥ २५ ॥ चेतस्तत्स्तवणायुंजन्नस्तावीत्संहतांजलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः ॥ २६

यशोयेषां ते ॥ २२ ॥ तेषां प्राक्तनभवः प्राक्तनजन्मसंयोगः सन्निधिः तेन विद्योतितं मनो यस्य स उक्तैर्गतिमृन् ॥ २३
अर्हणां पुष्पादिकर्म जलौघस्य उपतस्थे पूजयामास ॥ वृषाद्यामूर्ध्वान्स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुवस्त्रादि
भिः ॥ २४ ॥ कृपयावलोकेन हसच्च तद्वदनं च तेन उपलंभितान् प्रसन्नत्ववशोपितान् तेषां रोचिषा दीप्त्या
॥ २५ ॥ श्लक्ष्णया मधुरया सूक्तया वाचा भीरा धीया ॥ २६ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनुयुगं कल्पे कल्पे विभज्य गृहीतदेहाभिः ॥ ते भक्तिमद्भिः सविलासमितिभिः पृथग्भवः ॥ ब्रह्मणा स्मृतोऽस्मि ॥ तेभ्यः सकाशादे-
कएव मे मयाऽपहृतः ॥ शरणागतं प्रपन्नइत्येकमेव निर्दिष्टत्वात् ॥ सच युष्माभिरेव कर्तव्यमित्यर्थः
अस्य प्रपंचएक इति विविधैः ॥ प्रधाने रूपचारे दिव्यप्रधान इति वा पाठः ॥ प्रजननाय प्रजोत्पत्तये चित्तीकृतः ॥ चित्तेने
कीनीतः मनुसोपि हरादगोचरात् ॥ संतः कथं तत्र वयोपि वागताः ॥ २८ ॥ २९ ॥ तेन वयं यथाकृतः ॥ संकल्पस्तेन तथै

अत्रिरुवाच ॥ विस्मोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरि-
शाः प्रणतोस्म्यहं वः ॥ तेभ्यः कएव भवतामहहोपहृतः ॥ २७ ॥ एको मयेह भगवान्विविधप्रधाने ॥ स्त्रियी
कृतः प्रजननाय कथं नपुंसं ॥ अत्रागतास्तनुभृतामनसोपि दूरा द्रुतप्रसीदतमहानिह विस्मयो मे ॥ २८
मैत्रेयउवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्यूचुः श्लक्ष्णया वाचा प्रहस्य तमृषिप्रवीरं
२९ ॥ देवऊचुः ॥ यथाकृतस्ते संकल्पो भावयंस्तेन वानघ ॥ सत्संकल्पस्य ते ब्रह्मन्नन्यथेहायते न ते वयम् ॥ ३०
अथास्मदंशभूतास्ते प्रजाः सर्वा लोकविश्रुताः ॥ भवितारो गुणभृतो विस्मयं ते विनेष्यति ॥ ३१ ॥ एवं का
मवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः ॥ सभाजिताश्च तयोः सम्यक्कर्दमसोमिषतोस्ततः ॥ ३२ ॥ सोमो भूद्ब्रह्मणा
शेन दत्तो विप्रो रतियोगवित् ॥ दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥ ३३ ॥ श्रद्धा त्वंगिरसः या
न्नीचत स्रोसूत कन्यकाः ॥ सिनीवाली कुहू राका चतस्रोऽनुमतिस्तथा ॥ ३४ ॥ तमुत्रावपरावास्तां ख्यातौ
स्वारोचिषेन्तरे ॥ उतथ्यो भगवान्साक्षाद्बृहस्पतिः ॥ ३५ ॥

वभावेनान्यथा ॥ यतः सत्संकल्पस्य ते संकल्पः ॥ तर्हि कथं संकल्पिनध्यायमाने त्रयः प्रतीताः स्युस्तत्राह ॥ यदेकं
जगदीश्वरात्मकं तत्त्वं भवान्ध्यायति तएते वयं त्रयोपि तदेवैकं तत्त्वं नास्माकं भेदोस्तीत्यर्थः ॥ ३० ॥ विस्मयं ते विनि
स्तारयिष्यति ॥ अंतर्भूत विस्मयस्य रूपं ॥ ३१ ॥ ताभ्यां सम्यक्सभाजिताः पूजिताः संतत
तः स्थानात् ॥ प्रतिजग्मुः ॥ ३३ ॥ निबोध बुध्यस्व ॥ ३३ ॥ ताः कन्याः इति सिनीवालीति ॥ ३४ ॥ ३५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुलस्त्यस्य सुरूपिर्भुविपत्न्यामितान्वयः ॥ सोमस्यः दहीप्रिः जावरः विश्रवा पुलस्त्यस्य सुतइतिशेषः ॥ ३९ ॥ तस्यविश्र
वसइतिविख्यातोजातः ॥ सुतः कुबेरः अस्य सचिवार्थयोः कोशिमोरावणादयः त्रयः सुताः ॥ ४० ॥ ज्वलतः प्रकाशमा
नान् ॥ ४१ ॥ चित्रकेतुप्रमुखाजज्ञिरेतेचसप्तर्षयोजाताः ४० ॥ तानेवाह ॥ चित्रकेतुरितिवसुभृद्यानोनामैकः ॥

पुलस्त्योजनयत्पत्न्यामगस्त्यंचहविर्भुवि ॥ सोमस्यजन्मविदर्भायां विश्रवाश्चमहातपाः ॥ ३९ ॥ तस्ययत्तप
तिर्देवैः कुबेरस्त्विडविडासुतः ॥ रावणः कुंभकर्णश्चतथान्यस्यांविभीषणः ॥ ४० ॥ पुलहस्यगतिर्भार्या
जीनसूतसतीसुतान् ॥ कर्मश्रेष्ठवरीयांसंसहिष्णुंचमहामते ॥ ४१ ॥ क्रतोरपिक्रियाभार्यावालखिल्यान
सूयत ॥ ऋषीनषष्टिसहस्राणिज्वलतोब्रह्मतेजसा ॥ ४२ ॥ ऊर्जायांजज्ञिरेपुत्राविशिष्टास्तपरंतप ॥ चित्र
केतुप्रधानास्तेसप्तब्रह्मर्षयोमलाः ॥ ४३ ॥ चित्रकेतुः सुरोचिश्च विरजोमित्रएवच ॥ उल्बणोवसुभृद्या
नोपुमान्शुक्रादयोपरे ॥ ४४ ॥ चित्तिस्त्वथर्वणःपत्नीलेभेपुत्रंधृतव्रते ॥ दध्यंचमश्वशिरसंभृगोर्वक्षसि
बोधमे ॥ ४५ ॥ भृगुख्यात्यांमहाभागःपत्न्यांपुत्रान्जीजनत् ॥ धातारंचविधातारंश्रियंचभगवत्परा ॥ ४६
आयतिंनियतिंचैवसुतेमेरुस्तयोरदात् ॥ ताभ्यांतयोरभवतांमृकंडःप्राणएवच ॥ ४७ ॥ माकंडेयोमृ
कंडस्यप्राणाद्वेदशिरोमुनिः ॥ कविश्चभार्गवोवस्यभगवानुशनाःसुतः ॥ ४८ ॥ सर्वेतेमुनयःक्षत्तर्लो
कान्सर्वेरभावयन् ॥ एषकर्दमदौहित्रसंतानःकथितस्तव ॥ शृण्वतःश्रद्दधानस्यसद्यःपापहरःपरः

१ अ ४९ ॥ २

शक्रादयोपरेश्रुतयाःपुत्राः ॥ ४३ ॥ ४२ ॥ ख्यातिंपत्न्यांपुत्रान्पुत्रोपुत्रैर्वितानेवाहयातारमिति ॥ ४३ ॥ त
योःधातृविधात्रोः ॥ ४४ ॥ कविश्चभार्गवःभृगोःपुत्रः ॥ ४५ ॥ ब्रह्माएतेसर्वेलोकान्भावयत ॥ ४५ ॥ २

राम ॥ ४९ ॥ १ ॥ ॥ २ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अजात्मजः ब्रह्मपुत्रः ॥४९॥ मुक्तेभ्यः सर्वतत्त्वेभ्यः सिद्धिभ्यो वा ॥४८॥ ५१॥ सर्वेषां गुणानां उत्पत्तिर्यस्य सा ॥५२॥ ५३॥ उप
तस्थुर्भेजिरे ॥५४॥ निजया मायया यस्मिन् आत्मनि लेखा वेदरूपभेदं गंधर्वनगरमिव वेदं विश्वं विरचितं तस्यात्मनः प्रति
चक्षाणाय प्रकाशनाय आत्मानं योगयोगाङ्गस्वकारप्रकटितवान् ॥ तस्मै पुरुषाय नमः किंरूपेणाह ऋषेर्मू

प्रसूतिमानवीं दक्षं उपयेमे ह्यजात्मजः ॥ तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥४९॥ त्रयोदशादाद्धर्मा
यत्र षैकामयच्छिवः ॥ पितरं एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥४८॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः
क्रियोन्नतिः ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥४९॥ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया ॥ शां
तिः सुखमुदं तुष्टिः स्मयं पुष्टिरसूयत ॥५०॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ मेधा स्मृतिं तितिक्षा
तु क्षेमं ह्रीः प्रश्रयं सुतं ॥५१॥ मूर्तिः सर्वगुणोत्पत्तिः नरनारायणावृषी ॥ यतो धर्मपदो विश्वमभ्यतेद
त्सुनिर्वृतं ॥५२॥ मनांसि कुक्षेर्वाताः प्रसेदुः सरितोऽद्रयः ॥ दिव्यवाद्यानि तूर्याणि पेतुः कुसुमवृष्टयः ॥५३
मुनयस्तुष्टुवुः तुष्टाजगुर्गंधर्वकिन्नराः ॥ नृत्यंति स्म स्त्रियो देव्यो लेभिरे परमं गतिं ॥ देवादयस्तदाद्यः स
र्वे उपतस्थुरभिष्टवैः ॥५४॥ योगमायया विरचितं निजयात्मनीदं खे वृक्षभेदमिव तत्प्रतिचक्षणाय ॥ एते
नर्षिसदने ऋषिमूर्तिनाद्य आदुश्चकार पुरुषाय नमः परस्मै ॥५५॥ सोऽयं स्थितिव्यतिकरोपशमाय सृ
ष्टान्सत्त्वेन नः सुरगणाननुमेयतत्त्वः ॥ दृष्ट्यादृशा करुणयेक्षणविलोकनेन यच्छ्रीनिकेतममलं क्षिपता
रविंदम् ॥५६॥ एवं सुरगणैस्तात भगवंतावभिष्टुतौ ॥ लब्धावलोकैर्यत्तद्विरचितौ गौरवमादने ॥५७॥ ॥

निराकारोऽयस्मिन्नेतेन तेन रूपेण ॥५५॥ सोऽयं नोऽस्मान् सुरगणानन्यस्य करुणायुक्तेन विलोकनेन विशिष्टनेत्रेणाह
ष्टपातपश्यतकथंभूतेन यच्छ्रीनिकेतममलमरविंदं तत्क्षिपता तिरस्कुर्वता कथंभूतः ॥ अनुमेयं शास्त्रतो वि
चीनत्वस्माकं परोक्षं तत्त्वं यस्य कथंभूतात् स्मान् स्थितेर्जगतो यादर्थायतिव्यतिकरोपशमाय सत्त्वेन गु
णेन सृष्टान् ॥५६॥ लब्धावलोकौ ये सुरगणैस्तैरभिष्टुतावर्चितौ च संतौ अयत्नः ॥ ५७॥

यक्षाः किंपुरुषास्त
थाः पितरः सिद्धासा
ध्याश्च ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भुवोभास्यस्यथायनाशायचाकारएकवाक्यत्वार्थः॥ नीचसांप्रतमिहागतानिमर्थः॥ तदुक्तंतत्रे॥ अर्जुनेतनयावेषःकृ
ष्णोनारायणःस्वयमितियद्वद्वः॥ श्रीकृष्णःऊरुदृढ्हार्जुनःउभावपिकृष्णनामानौ॥ ५८॥ अत्राभिमानिनादेवातस्वा
हानामतस्यभार्याकृतभोजनमितिजयाणांविशेषणा॥ ५९॥ पितरस्त्रयःपितामहएकःतैःसाकंसह॥ ६०॥ वैतानिकेवै
दिककर्मणिस्वजेयेषांनामभिरग्निदेवताकाइष्टयोनिवृप्यंतेमतएतेग्रयोनलौकिकाः॥ अतोबहूनांवेयर्थ्यइति।

तानिवैवेभावतौहरेरंशाविहागतौ भारव्यपायचभुवःकृष्णोयदुकुरूद्वहौ॥ ५८॥ स्वाहाभिमानिनश्चाग्ने
रात्मजास्तीनजीजनत॥ पावकंपावनानंचशुचिंचहुतभोजने॥ ५९॥ तेभ्योग्रयःसमभवंश्चतारिपञ्चपे
चच॥ तएवैकोनपंचाशत्साकंपितृपितामहैः॥ ६०॥ वैतानिकेकर्मणियेनामभिर्वह्निदेवादिभिः॥ आग्नेया
नग्रयस्तेषांपत्नीदाक्षायणीस्वधा॥ ६२॥ तेभ्योदधारकन्येद्वेवपुनाधारिणीस्वधा॥ उभेतेब्रह्मवादि
न्यौज्ञानविज्ञानपारगे॥ ६३॥ भवस्यपत्नीतुसतीभवंदेवमनुव्रता॥ आत्मनःसदृशंपुत्रंनलेभेगुणशी
लतः॥ ६४॥ पितर्यप्रतिरूपेस्वेभवायानागसेरुषा॥ अप्रौढेवात्मनात्मानमजहाद्योगसंयुता॥ ६५॥
६२ इष्टयोयज्ञैर्वृप्यंतेग्रयस्तुते ६३ अग्निष्वात्तावर्हिषदःसौम्याःपितरआज्यपाः॥ साग्नेया ६३॥
इतिश्रीभागवतेचतुर्थस्कंधेप्रथमोध्यायः॥ १॥

भावः॥ ५९॥ सौम्याःसोमपाःयेषामग्नौकरणमस्तिनेसाग्नयः तद्रहितास्त्वनग्नयः ६३॥ तयोस्तुसंतति
संततिर्नाभवत॥ जीवन्मुक्तत्वादित्याह॥ उभेतेइति॥ ६३॥ गुणशीलतआत्मनःसदृशोदेवमनुष्यव्रताभिसती
पुत्रंनलेभे॥ ६४॥ तत्रहेतुःस्वपितरिदक्षेप्रतिरूपेप्रमदपोप्रतिकूलेसा।
तीत्यर्थः॥ आत्मनःस्वयमेवात्मानंदहमजहात्॥ सक्तवतीयोगासंयुतायोगमाश्रितेति॥ ६५॥ इतिश्रीभावार्थचन्द्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वितीये प्रथमाध्यायोपनिषद्भवदत्तयोः ॥ विद्वेषावर्पितेहेतो विष्णुस्तस्य जसंभवः ॥ १ ॥ संती सतीनामंत्री ॥ २ ॥ न चासौ कस्य
विद्वेषार्हः इत्याह कइति चराचरगुरुं जगतो देवतं चते को द्वेष्टि ॥ कथं च निर्वैरद्वेष्टिभिर्वैरते हेतुः ॥ भक्तिः ॥ शांते ।
शांतिरेव विग्रहो यस्य कृतात्मा तेन वारामो यतिस्मृतः ॥ यज्ञाकः प्रजापतिर्दक्षः कथं द्वेष्टि ॥ एवं भूते तस्मिन् द्वेषो युक्तो
शक्यश्रमर्थः ॥ २ ॥ यतो हेतो विद्वेषः ॥ यतो विद्वेषात् प्राणास्तत्याज ॥ एतदाख्याहि ॥ ३ ॥ तदेव व्याख्यातुमितिहासं ।

विदुरः ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनाहृत्यात्मजां सतीं ॥ १ ॥ कस्तं
चराचरगुरुं निर्वैरशांतवैग्रहं ॥ आत्मारामं कथं द्वेष्टि जगतो देवतं महत् ॥ २ ॥ एतदाख्याहि मे ब्रह्मन् जामा
तुः श्वशुरस्य च ॥ विद्वेषस्तद्यतः प्राणांस्तत्याज दुस्त्यजान्सती ॥ ३ ॥ मैत्रेयः ॥ पुरा विश्वसृजां सत्रे समेताः
परमर्षयः तथा सुरगणाः सर्वे सानुगा मुनयोग्रयः ॥ ४ ॥ तत्र प्रविष्टं मुनयो दृष्ट्वार्कमिव रोचिषा भ्राज
मानं विनिर्धूतं तत्सदस्यदः ॥ ५ ॥ उदतिष्ठन्सदस्याग्नौ स्वाधिस्थेभ्यः सहाग्रयः ॥ ऋते विरिंचं शर्वं
च तद्भासातिप्रचेतसः ॥ ६ ॥ सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः ॥ अजं लोकगुरुं नत्वा विमनस्ताद
तदाजहे ॥ ७ ॥ प्राङ्निषण्णमडं दृष्ट्वा नासृष्यत्तदनादृतः ॥ उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ८
ब्रह्मर्षयो मे शृण्वंतु सहदेवाः सहाग्रयः ॥ साधूनां भुञ्जतां हृत्तं नास्तान्नात्र च मत्सरात् ॥ ९ ॥ अयं तु लोकपा
लानां यशोघ्नो निरपत्रपः ॥ सद्भिराचरितः पंथा येन स्तब्धेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहि
तरं ग्रहीत् ॥ पाणिं विप्राग्निमुखतः सावित्र्या इव साध्वयत् ॥ ११ ॥

प्रस्तोतिष्ठेति ॥ समेतानासन् ॥ ४ ॥ प्रविष्टं दृष्टमिति शेषः ॥ सहासदः सहतो सभां ॥ ५ ॥ स्वाधिस्थेभ्यः स्वीया
सनेभ्यः ॥ ६ ॥ ७ ॥ प्राक् लोपवेषानादृत्य मेव निषस्मामपविष्टं मडं शिवं । वदनादृतः तेनाभ्युत्थानादिभिरकृ
तादरः नासृष्यत् नासहत ॥ वामं च क्रूरं यथा भवति तथाभिवीक्ष्य ॥ ८ ॥ मे वचनं शृण्वंतु ॥ प्रज्ञानात्मत्सरात्त्वं च
तः ॥ ९ ॥ स्तब्धेन उचितक्रियाशून्येन भ्रष्टेन ॥ १० ॥ तदेवाह एष इति यस्मात् ॥ विप्राग्निसमक्षं सावि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री·
भाव·
टी·
५

मृगशावस्य हरिणाबालस्य दिग्गीदिग्गीयस्याः अनुयाना अभिवादार्हे मयि उचितं समानं वा वाचापि नाकरोत् ॥ ४ ॥ अ
तहीयकस्यादनेयनुतप्यमानमाह ॥ लुप्तक्रिया येति सार्धैः चतुर्भिः उशनीवेदलक्षणगिरं ॥ ४ ॥ प्रेतावासेषु श्मशा
नेषु ॥ अप्राविकीर्णाः केशा यस्य ॥ ५ ॥ चिताभस्मकृतस्नानः प्रेतस्रग्रचितभूषणः
शिवापदेशोऽशिवोऽमंगलो भूतजनप्रियः ॥ ५ ॥ पतिः प्रमथभूतानां तमासाद्य आत्मकान्तमा ॥ तस्मादुन्मा
दनाद्याय नष्टशौचाय दुर्हृदे ॥ ६ ॥ दृष्टावतमयासाधी चोदितौ परमेष्ठिना ॥ ६ ॥ ५ ॥ ३ ॥

गृहीत्वा मृगशावाक्षः पाणिं कुरुदलोचनः ॥ प्रत्युत्थानाभिवादार्हे वाचापि कृतिनोचितं ॥ ३ ॥ लुप्तक्रिया
याश्रुचयो मानिनेभिन्नसेतवे ॥ अतिक्रुद्धापि दीवाला शूद्रायैवाशनीं विरे ॥ ४ ॥ प्रेतावासेषु घोरेषु प्रेत
तप्तो हृतः ॥ अट मुन्मत्तवद्वत्स मोक्षुकेशो हसन्रुदन् ॥ ५ ॥ चिताभस्मकृतस्नानः प्रेतस्रगशिभूषणः
शिवापदेशोऽशिवोऽमंगलो भूतजनप्रियः ॥ ५ ॥ पतिः प्रमथभूतानां तमासाद्य आत्मकान्तमा ॥ तस्मादुन्मा
दनाद्याय नष्टशौचाय दुर्हृदे ॥ ६ ॥ दृष्टावतमयासाधी चोदितौ परमेष्ठिना ॥ ६ ॥ ५ ॥ ३ ॥

न

त्रपि तत्संबंधलोभेन तवान् ॥ शूद्रायेयनर्हत्वमाह ॥ दृष्टांतेन हीनत्वे पूर्वापरस्ववचनविरोधापतेः ॥ एतदुक्तं भा
वति ॥ यथाकश्चित् शूद्रायवेदमर्थं लोभेन ददाति ॥ तद्वदिति प्रेतावासेष्विति सादि सर्वं विडंबनमात्रमिति स्वयमे
वाह उन्मत्तवदिति ॥ अत्यथा उन्मत्त इव वाक्यत ॥ अशिवो नास्ति शिवो यस्मात् ॥ अमतो मत्तजनप्रिय इति छेदः प
तिः प्रथमभूतानामिति भक्तवात्सल्यमाह ॥ तासमानपि दोषमपनीय पातीति ॥ नष्टानामपि शौचं शुद्धिर्यस्मात् ॥ दुष्टे
ष्टे ते मया उक्तं पाठ इति हन्मनो यस्य स दुर्हृत् तस्मै वते ति हे पैत्र स्वगो वा कालेजा भयादिकं परित्यज्य दत्ते त्यर्थः ॥ ६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अप्रतीयं अप्रतिकूलं यथा भवत्येवं भवेत्स्थितमपि विनिंद्य ॥१७॥ देवानां यज्ञनसमये देवैः सह भागौ न लभतो किं तु ते
भ्यः पूर्वमेव लभतां प्रभोजित्वात् ॥ यज्ञे तेषु भुक्तवत्सु लभतां सर्वपोषकत्वात् अत्र हेतुः देवगणायमेव यस्मा
त्सः ॥१८॥ सदतः ॥ तस्मात्स्थानाद्विनिःक्रम्य जगाम ॥ हे कौरव्य ॥१९॥ गिरिशास्यानुगानां मुख्यः रोषपरक
षायः तेन दूषितः आरक्तनेत्र इत्यर्थः ॥ तस्य गिरिशस्य वाच्यतां वचनानर्हतां निंद्यतामित्यर्थः तेभ्यो पि शापं विससर्ज

मैत्रेयः ॥ विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं ॥ दक्षो यागपरिभ्रष्टः शापं प्रचक्रमे ॥१७॥ अयं तु दे
वयज्ञनष्टो पेक्षादिभिर्भवः ॥ सहभागं न लभतां देवैर्देवगणायमः ॥१८॥ विनिंद्यमानः समक्षं स्वस्य मुख्यै
र्दक्षो गिरित्राय विसृज्य शापं ॥ तस्माद्विनिःक्रम्य विहृत्य मत्तः ॥ जगाम कौरव्य विजेतिकेतनं ॥१९॥ विज्ञाय
शापं गिरिशानुगाग्र्यौ नंदीश्वरो रोषकषायदूषितः ॥ दत्ताय शापं विससर्ज दारुणं ये चात्र मोदेत्स्तदवा
प्र३ अतो द्विजाः ॥२०॥ यः पृष्टतस्तर्पयति द्विषन्नयावर्यं तिष्ठति ॥ कुह्यतज्ञः पृष्ठ्यगृष्टिः तत्ततो विमुखो भवेत्
२१॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतंत्रं वितनुते वेदवादविपन्नधीः ॥२२॥ बुद्ध्यापराभिया
विस्मा विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्तु तिर्यग्दतो वस्तु सुखो विरात् ॥२३॥ ॥॥॥ रामज्यो ॥

र्ती ॥२०॥ दत्तं पापपतिसार्थैस्त्रिभिः ॥ यतस्तर्पयति दत्तशरीरेऽद्विषन्प्रेष्टमतावर्यं तिष्ठति प्रतिरोहमकुर्वन्तिष्ठ्यगृष्टिः
भवेद्दत्तो नतनः परमार्थो न भवेत् ॥ भवन्निमेकः शापः ॥२१॥ अज्ञानमेवाह ॥ गृहेषु स्थितिकर्मतंत्रं कर्मपरिकरं वेदे
ये वादास्तैर्विपन्नधीः अस्यर्थवादा यज्ञयोहदेवात्मो स्मयाजिनः सहृतेभवतीत्याह ॥ यस्तेविपन्नाविनष्टार्थीर्यस्य ॥२२
परो देहादिः तमेवात्मत्वेनाभितो ध्यातं पुष्टं लब्धं स्यात्तया बुद्धिविस्मृतात्मनो गतिः तत्त्वं येन अतः पशुत्व
त्वः ॥ अतितरां स्त्रीकामो स्तीति द्वितीयः शापः वस्तु सुखमिव सुखं यस्य तिर्यग्तीयः शापः ॥२३॥ ॥२॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अयं च शापो स्यात् तद्रूप एवेत्याह ॥ विद्यातपोभिः स्वमेव तत्तद्विधमिति हि यस्मात् ॥ अतो मोक्षज्ञ एव विद्वान् शापतिसंसरति
ति सार्थाभ्यां शब्दमसत इति ॥ तथा तं शब्दं दुःखं वेचानुवर्ततेसंसरेत् अन्यमरणाय तु भवति विलेकः शापः ॥ २४ ॥ ऋता
यावद्रूपायाः प्रजिघ्रिणाः प्रजाः स्त्रियाः स्त्रियाः वादाः मनः लोभकलाः ॥ अर्थवादवञ्चनावाइत्यर्थः ॥ मधुरं यत्तु लेख
प्रवोचं नमश्रामनः लोभकेन उन्मथितं आत्मामनो येषां तेषां मुखतक्रमेस्वा शक्ता भवति द्वितीयः ॥ २५ ॥ सर्वभक्ष्याः
भक्ष्याभक्ष्यविचारशून्याः वृत्त्यर्थं देहादिपोषणाय वृत्तानि विद्यातपोव्रतानि यैः ॥ विद्यादिषु वश्यारामोरतिर्येषां तेया

दिद्याद्विविधिपायांकर्मसयामसोजडः ॥ संसरंतिहृयेचाशुमद्भावेवमानिनं ॥ २६ ॥ विरः ऋतायाः
प्रजिघ्रिणामयुराय नभूतिणा ॥ मत्राचोन्मथितात्मानः मुखस्यतक्रहरद्विषः ॥ २७ ॥ सर्वभक्ष्याहिजाहृसंधृत
विद्यातपोव्रताः ॥ वित्तदेहेंद्रियारामाश्चकाविवरंतिह ॥ २८ ॥ तदेवं वदतः शापऋत्वाहिजकुलाय वै
भृगुः प्रसस्रजब्रह्मपब्रह्मदंडं उरत्ययं ॥ २९ ॥ भवव्रतधरायेचये चतास्मनुव्रताः ॥ पाषंडिनस्ते भवंतु
सच्छास्त्रपरिपंथिनः ॥ ३० ॥ नहृष्टो वासृष्टियोजटाभस्मास्थिधारिणः ॥ विशतशिवदीक्षायांयत्रदेवं
सरासवं ॥ ३१ ॥ ब्रह्मब्राह्मणांश्चैव यद्यूयं परिनिंदथ ॥ सेतुं विधारणं पुंसां मत्तः पाषंडमाश्रिताः ॥ ३२
यस्य एव हि लोकानां शिवः पंथाः सनातनः ॥ यं पूर्वे चानुसेनस्यूर्यस्मा माणजनार्दनः ॥ ३३ ॥ तद्ब्रह्मपरमं
शुद्धं सतां वर्त्म सनातनं ॥ विगर्ह्य यातपाषंडं वेदबाह्यं बहूनराः ॥ ३४ ॥ ॥ ॥

चकाः संतो विचरंति तिच शापं चत्वं हृयं
प्रसस्रजत प्रसदात् शापं रूपं ब्रह्मदंडं ॥ २९ ॥ सच्छास्त्रपरिपंथिनः प्रतिकूलाः २८ सरागाडीयेष्टीमाशीच आ
सवस्त्रालादिसंभवं मद्यं दंडैकपाकुवतं ॥ तद्यत्रदेवं पूज्यं देवतादादरणीयमिति सर्वः ॥ ३१ ॥ ब्रह्मवेदकर्मभूतं सेवं
मर्यादारूपं ॥ तदेवाह ॥ पुंसां वर्णाश्रमाचारवतां विधारणं धारकं ॥ ३२ ॥ सेतुं प्रपंचयति द्वाभ्यां एवं वेदलक्षणए
वं शिवः पंथाः ये पूर्वे ऋषयः ॥ अनुसेनस्युः अश्रितवंतः यत्र यस्मिन् जनार्दनः प्रमाणस्थले ॥ ३३ ॥ भूतराट् भूतानां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्योपयुक्तापेनोभयोः नाशात्तविमानाइवेतितथापिभगवद्दत्तग्रहीतानांनाशोनस्यादितिभावः॥३३॥ऋषभः सर्वश्रेष्ठो
हविः यज्ञेष्टः पूज्यः॥३४॥ततमंत्रसम्यक्कृविधायहेमहेष्वासविदुर॥यत्रप्रयागेप्रवितातत्रावभृथस्नानंकृत्वा॥ततः
स्यानाघयुः॥३५॥इतिश्रीभावार्थेचतुर्थस्कंधेद्वितीयः॥२॥तृतीयेतुसतीतातयज्ञोत्सवदिदृक्षया॥गमिष्यंतीमहेशो
नवारितानीतिहेतुभिः॥प्रियमानयोः॥पृथक्प्रवत्स्यानइत्यमात॥१॥रुद्रविहीनोयज्ञोनास्त्येव॥तथापि॥दक्षयज्ञ
स्यरुद्रपरित्यागोद्वेषाद्भवतीत्यत्रद्वेषहेतुरुक्तः॥गर्वहेतुमाह॥यदातुप्रजापतीनामाधिपत्येभिषिक्तः॥तदातस्यसम
मैत्रेयः॥तस्मैपर्ववदतःशापंभृगोःसभगवान्भवः॥निश्चक्रामततःकिंचिद्विमनाइवसानुगः॥३३॥तेपिवि
यस्रजःसत्रंसहस्रपरिवत्सरान्॥सेविथायमहेष्वासयत्रेष्टऋषभोहविः॥३४॥आप्लुत्यावभृथंयत्रगंगाय
मुनयान्विता॥विरजेनात्मनासर्वेस्वंस्वंधामयथोपसत्तः॥३५॥इतिश्रीभागवतेचतुर्थस्कंधेद्वितीयोध्याय २
मैत्रेयः॥सदाविद्विषतोरेवंकालोवैधियमाणयोः॥जामातुःश्वशुरस्यापिसमहानतिचक्रमे॥१॥यदाभिषि
क्तोदक्षस्तुब्रह्मणापरमेष्ठिना॥प्रजापतीनांसर्वेषामाधिपत्येमयोभवत्॥२॥इष्ट्वासवाजपेयेनबृहस्पति
नभिभूयच॥बृहस्पतिसवंनामसमासेमेकतूत्तमे॥३॥तस्मिन्नुपसमायाताःसर्वदेवर्षिपितृदेवताः॥आसन्कृ
तस्वस्त्ययनाःतत्पत्न्यश्चसभर्तृकाः॥४॥तत्रप्रचक्रमेचाणांप्रजल्पतांसतांपितुर्यज्ञमहोत्सवं॥५॥व्रजंतीःसर्वतोदिग्भ्यउपदेववरस्त्रियः॥विमानयानाःसंभ्रांतनिष्कंठीःसुवाससः ८
योगर्वोभवत्॥२॥गर्वादिवब्रह्मनिष्ठाद्वेषतोगर्वमभूयतिरस्कृतमवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजतेतेति॥अतेर्वाज
पेयेनेष्ट्वासमावेभे॥३॥कृतस्वस्त्ययनाःकृतमंगलाःसभर्तृकाइतिदक्षिणादिभिः॥प्रथमसंहितानामपिपत्न्यईशो
पुवरहणमुक्तं॥४॥तत्रतत्रैवचराणांप्रजल्पतांसतांपितुर्यज्ञमहोत्सवंकृत्वा॥५॥तत्रव्रजंतीरुपदेववरस्त्रियोगंधर्वादी
नांवराः॥त्रियश्चस्वस्वनिलयस्याभाशोहमेवेदृश्यौक्तस्यानिसभाभाषतेतिन्यायाणान्वयः॥कथंभूताः॥सि
योदृष्टः॥विमानानियानानिः॥आर्यांताः॥श्रेष्ठैःसहिताःनिष्कानिचंद्रकानिकंठेषुयासां॥शोभनानिवाचांसियासां ८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रीः भाचं टी

लोलानि पंचलान्यलीनि घासांस्त्वा तुल्लानि यासांता ॥ ६ ॥ नियोपितः प्रवर्तितः कैः कामैः शिवतेय यर्थिता इच्छतः किं वियं च
तत्राभिसरामगच्छामनवाद्या वियागोनि वृत्तः ॥ यतो मीवि वृथाव्रजेति ॥ ८ ॥ तेन्तरवंप्रकटयंप्राकृतस्मिन्निति षष्ठ्यः पितृ
भ्यां मुग्धीनंदतं परिवर्द्धमलंकारादिकृतं भवतमहं ग्रहितं स्वीकर्तुं कामये ग्रहितमिति पाठे ॥ सन्कृतं परस्त्रिर्ह इच्छा
मीति ॥ ९ ॥ अस्यभर्तीनां भर्तृभिः संमतोः सहस्त्रीः क्रियेत्रियं ब्रह्मा इंचितोचिरसुतकुमुक्तकं समायस्या साहइदासि
हेम्हड ॥ उत्तीयमानं प्रवर्तीमानं प्रश्नेरप्रभुजा भिरहं पूर्वं ग्रष्टमश्नेर ॥ यद्वाउ त्रिप्रसाणायजेकंतं यूयंवा ॥ १० ॥ अहोकिं

हृष्टास्वनिलयाभ्यो लोलाक्षी र्मृष्टकुंडलाः ॥ पतिंभूत पतिंदेवमौत्सुक्याद्भयभाषत ॥ ७ ॥ सतीउवाच ॥ प्रजा
पते स्तेस्यप्रश्नस्यसांप्रतं ॥ नियोपितोव्रजमेवोत्सवः किल ॥ वयं चतत्राभिसरामिवामतेयर्थिता मीविवृथाव्र
जेतिहि ॥ ८ ॥ तस्मिन्भवीन्यो ममभर्तृभिः सकैः कंवगमिष्यतिसुहृद्दिष्टवः ॥ ग्रहंचतस्मिन्भवतामिकाम
येसहस्त्रीतंपरिवर्द्धमलंकारादिकं ॥ ९ ॥ तत्रसमैनंभर्तृभिर्ममताभाटस्वहः क्रियत्रियंचमातरं ॥ इदंचिरो
तकेवमनामहर्षिभिरुत्तीयमानंवसुधाधरेश्वर ॥ १० ॥ त्वयेतदाश्चर्यमजातमाद्यया विनिर्मितंभातिगु
णात्रयात्मकं ॥ अथापिहंयोषिदतत्वविद्यते ॥ दीनादिकृष्टेभवमेभवत्विति ॥ ११ ॥ पशूपयोतीरभवाय
योषितोप्यलंकृताः कांतसखावृत्यशः ॥ यासांव्रजद्भिः शितिकंठमंडितं ॥ नभोविमानैः कलहंसयाडुभिः
॥ १२ ॥

तत्राश्चर्यंयेनतदैतदौत्सुक्यामितिवेदनाह ॥ त्वयीतिहे अजयतद्विश्वमाश्चर्यं रूपंत्वयैवत्वन्मायया रचितं विभाति ॥
अतोयद्यपितत्रतवनाश्चर्यबुद्धिः ॥ तथाप्यहंयोषितउत्सुकस्वभावात्तवतत्त्वंनजानामि ॥ अतोदीनाकृपणासती हे
भवमेभवत्विति जन्मभूमिदिष्टेदृष्टमिच्छामि ॥ ११ ॥ दिष्टदामेवकेसतामायेनयनक्ति ॥ पशूपेतिद्वाभ्यांहे अभवेति
सुहृद्दियोगदुःखंत्वयानास्वादितमिति भावः ॥ अथापोषितःमेवेयरहिताअपिप्रयोतीः पशूपकांतसखा भर्तृसहि
तावृत्यशः सवेशाः कथंभूताः यासांविमानैर्नभोमंडितंताः हे शितिकंठेति परावृत्य हायत्वयाविषमपिभक्षितमि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हे सुरश्रेष्ठ पितृगेहे स्वोत्सवं विशम्य तु नायादेहं कथं नेगते दृष्टं न प्रचितं तथाप्यनाहूताः संतः कथं गच्छामः तत्राहुतो
ह्यदेसुहृदः केतनं गृहं तथा भ्रातृदीनां च गृहं अनाहूता अप्यभियंति ॥ संतः हृस्वमार्गे ॥ ३ ॥ हे अमर्त्य तत्स्मात्त्वसी
यत इदमेवाहितकर्तृ भवानर्हति कारुणिकत्वमेवाह ॥ अदभ्रचक्षुषा अनन्यज्ञानेन पितृयात्मनो देहस्यार्थे हं
निरूपिता भृता यतो यूयं नारीश्वर इति ख्यातोऽस्मि अतो मामनुगृहाण याचितः सन् ॥ ४ ॥ अभिभाषितो सि याचितः कः
दत्तः यानाह ॥ मर्मभिदं तिये तान् ऊवाचि सूनुरुक्तिबाणान् संस्मारितः सन् ॥ ५ ॥ अनाहूता अपीति त्वया यदुदि

कथं सुतायाः पितृगेहे कौतुकं विशम्य देहं सुखयितुं गते ॥ अनाहूता अप्यभियंतीति सोऽहं भर्तुर्गुरोर्देहकृत
श्च केतनं ॥ ३ ॥ तन्मे प्रसीदेदमर्मर्त्य वांछितं ॥ कर्तृ भवान् कारुणिको वताहति ॥ त्वया आत्मनो यो देहमदभ्रच
क्षुषा ॥ निरूपिता मामनुगृहाण याचितः ॥ ४ ॥ ऋषिरुवाच ॥ एवं विरिंचिः प्रियया अभिभाषितः ॥ प्रत्यभाषत सू
नृ सन्नृतं प्रियः ॥ संस्मारितो मर्मभिदः ऊवाचि सूनुना नाहं कोपि स्रष्टा समवतः ॥ ५ ॥ श्रीभगवा
नुवाच ॥ त्वयोदितं शोभनमेव पुत्रे भवे ॥ अनाहूता अप्यभियंति वेयुष्य ॥ तेयं यदुत्पादितदोषदृष्टयो व
लीयसा नात्मसदेनमनुना ॥ ६ ॥ विद्यातपोवित्तवपुर्वयः कुलैः सतां गुणैः षड्भिरसत्तमेतरैः ॥ स्म
नाहता यां भृतमावदुर्धियः स्तब्धा न यं पर्यभिहृत्य सा ॥ ७ ॥ २ ॥

तत्र कं तत्र शोभनमेव ॥ किंतु ॥ अनात्मदेहादावहंकारः तत्कृतेन मदेन मनुना च ते वयं वोयदि उत्पादित
दोषदृष्टयो भवंति ॥ नहि नउत्पादिते अरोपितदोषे दृष्टिर्येषां ते ॥ ६ ॥ नन्वविद्यादिगुणयुक्तो दक्षः त्वादृशो प्रम
हन्स कथं दोषदृष्टिर्भवेत् तत्राह ॥ विद्यादिभिरेव संस्मरो नहता यां विवेकज्ञाने नष्टे सति भूयसा महतमानो यां स
तेजो न पर्यभिहि ॥ ननु गुणैः कथं विवेकनाशः ॥ तत्राह ॥ सतां गुणैर्विवेकहेतुरपि असन्मानामितरैः दो
षभूतैः ॥ अत एव ते भूतः भृतः ॥ पुष्टो वा अहं विद्वान् ॥ तापस इत्यादिमानो सर्वः ते नउ स्तब्धा दृष्टिर्येषां ते ॥ ७ ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री·
भाव·
टी·
८

स्वजनव्यपेतया वंधकृत्या गृहान्न प्रतीयान्नाव लोक्यते ॥ सवर्णिनी विमन्त्रमेवाह ॥ येन वक्रिया ऊर्ध्वलया वु।
ऊर्ध्वस्य वृंपति आरोपिताऽत्रैभिन्नाभूर्यस्य जानयोपित भूमिते रावोपिता भूरितिवा ॥ १८ ॥ ननु स्वजनवानां गृहे स्वस्त्रि।
रंतिव्यते तेषां चेष्टितं वसोऽव्यंवतस्य दुः सहत्वादित्याह तेषु निशरिभिः शिलीमुखैः वाणैः अर्दितो वाः खंडितगात्रा
पितव्यनव्यथते ॥ यतः शोते स्वपितिस्वानां दुरुक्तिभिर्मर्मस्ताडितो यथा हृदयं ताडयति ॥ १९ ॥ मयि

नैतादृशानां स्वजनव्यपेतया ग्रहास्तीयादनवस्थितात्मनां ॥ येभ्यागतान्नुक्रियाभिचक्षते आरोपित
भूमिरमर्षिणादिभिः ॥ १८ ॥ तथा रिभिर्व्यथ्यते शिलीमुखैः शोते दितो हृदयेन हृयता ॥ स्वानां यथा वक्र
धियो दुरुक्तिभिर्दिवा निशं तथ्यति मर्मताडितः ॥ १९ ॥ व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि
सभ्रुसंमता ॥ अथापि मानेन पितः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥ पापच्यमानेन हृदा
तरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणा ॥ अकल्पएषामधिरोढुमंजसा परं पदं द्वेष्टि यथासुरा हरिम
२१ ॥ २ ॥

तत्र गतायां नेयं शंकेति चेत्तत्राह ॥ व्यक्तं निश्चितं उत्कृष्टगतिः ॥ स्थितिर्यस्य तस्यात्मजानां कन्यानां मध्ये त्वं प्रिया।
सि मे संमतासि ॥ पितः सकाशात्मानेन लप्स्यसे मदाश्रयात्मत्संबंधात् ॥ २० ॥ ननु भगवन्त्वया किमिति दक्षः
तिरस्कृतो यतो मोत्वा द्वेष्टि अत आह ॥ पापच्यमानेनालं दह्यमानेन हृदा दुःखितेंद्रियः ॥ काभिः पुरुषाजीवः तस्य
बुद्धिश्चिंतनं तत्साक्षिणा निरहंकारेणाभिमर्थः ॥ समृद्धिभिः पुण्यकीर्त्यादिभिः ॥ एषां पदं स्थानं ऐश्वर्यं प्राप्तमकल्पः
अशक्तः सन परं पदं द्वेष्टि असुरा यथा हरिं केवलं द्विषंति ॥ २१ ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नतु तत्प्रसूत्पादनिवृत्त्यायकरणादवस्थानएवासौ तत्राह ॥ इह समध्यमे प्रसङ्गमादिकं मिथोजनैर्यद्विधीयते तत्प्राज्ञैः
साधु विधीयते साधुत्वमेवाह ॥ परस्मै श्रीवासुदेवाय ग्रहायायं तत्पर्यिणएव तच्चेतसैव परिहृतोतिस्मिन्कार्यि
कव्यापारायोगात् ॥ अतोंतर्यामिदृष्ट्यामनसासर्वंकृतमितिभावः ॥ २५ ॥ किंच ॥ नकेवलमभ्यासेनैवेश्वरवासुदेव
दृष्ट्यानमनेक्रियते ॥ किंतु नित्यमेवनसिवासुदेवश्रितनइत्याह ॥ विशुद्धंसत्वमेनः करणं सत्वगुणोवावासुदेवश
ब्दितेवसुदेवशब्देनोक्तः ॥ यतस्मात्तत्र तस्मिन्सत्वेपुमान्वासुदेवइयतेप्रकाशते ॥ अयं तमाहृतमाचरणा ॥
यस्मात्तस्य अयमर्थः ॥ वासुदेवेभगवति प्रतीयतइतिहिवासुदेवः परमेश्वरः प्रसिद्धः ॥ सचविशुद्धेसत्वेप्रतीयते ॥

प्रसङ्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथः समध्यमे ॥ प्राज्ञैः परस्मैपुरुषायचेतसाग्रहायया
यैवनदहमानिने ॥ २२ ॥ सत्त्वेविशुद्धेवसुदेवशब्दिते ॥ यदीयतेतत्पुमानेवपाहृतः ॥ सत्त्वेचतस्मिन्भगवा
न्वासुदेवो ॥ ह्यधोक्षजोमेमनसाविधीयते ॥ २३ ॥ तेनेतिरीक्षोनपितापिदेहकृद्दृशोममहिदृतदनुव्रता
श्रये ॥ योविश्वसृग्यज्ञगतेवरोरुणामनायासंसृजदंबिकाकरोत्तिरः ॥ २४ ॥ २ ॥

अतः प्रसङ्गयार्थेनप्रसिद्धेन ॥ प्रकृतमर्थोविधीयते ॥ ततः चवासयतिदेवमिति विशुद्धसत्वावस्थमिति वासुदे
देवशब्दवाच्यं ॥ शुद्धंसत्वंततः किमतआह ॥ सत्त्वेचतस्मिन्मेमयानमस्कारेणात्र विधीयतेसेव्यतेइत्यर्थः ॥ मन
सेतिपदेमनसाविशेषेणाधीयतेध्यायतेचिंतयतइत्यर्थः ॥ सयतः अधोक्षतेप्रत्यक्षतेइंद्रियेषुजायतेप्रकाशा
तेइंद्रियागोचरइत्यर्थः ॥ २२ ॥ तस्मात्तयानतिरीतः देहकृद्दृशीतिमोघकन्यादिति ॥ ऐश्वर्यादिकपितत्रयाहृ
त्यर्थं हिदृशाजुः ॥ तदेवाहदेवरोरुदत्तः विश्वसृजोयज्ञगतेमांनिरपराधतिरस्करोतिरस्कृतवान् ॥ २४ ॥ २
+ ५ ॥ वः ॥ दीप्यतेयोतनइतिवा ॥ वसुभिः प्रणयेदीप्यतिप्रकाशतेइतिवासुदेवः + ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विदेशे दोषमाह पदीति मद्वचो तिक्रम्य यतः संभावितस्य प्रतिष्ठितस्य यदा भवति तदा स पराभवः तस्य मरणाय
कल्पते ॥ इति श्रीभावार्थे चतुर्थे स्कंधे टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ चतुर्थेऽपि पतिं हित्वा गतामिव शिवमानिता ॥ रुषाभिभर्त्सितोऽप्य
लज्जहोदेहमितीयते ॥ उभयत्रानुज्ञानेन बलात्निवारणेन च ॥ सुहृदिष्टः विक्रमती भवान् परिशंकिता पुनर्विविशती च
तदा साकूतोद्विधा सव भूत्र ॥ १ ॥ सुहृदां दिष्टतायाः प्रतिज्ञानेन दुर्मनाः अस्मृणां कलाभिः लेशैः अतिविह्वला आकुला ॥
अप्रतिष्ठरुषं स्वसमानं रुषांतररहितं ॥ प्रधक्ष्यतीव भस्मीकरिष्यतीव रुषा ज्ञातो वेपथुः कंपो यस्याः ॥ २ ॥ ततस्तं

यदि मिथ्यस्य तिहायमद्वचो भद्रं भवत्यानतो भविष्यति ॥ संभावितस्य ह्यजनात्पराभवो यदा स सद्यो मर
णाय कल्पते ॥ २८ ॥ इति श्रीभागवते चतुर्थे स्कंधे द्वाविंशोऽध्यायः ॥ २२ ॥ मैत्रेयः ॥ एतावदुक्त्वा विरराम शंकरः
पत्न्यां गतायां हृदयं च चिंतयन् ॥ सुहृदिष्टः परिशंकिता भवान्निष्क्रामतीति विशंती द्विधासती ॥ १ ॥ सु
हृदिष्टतां प्रतिज्ञानेन दुर्मनाः ॥ स्नेहाद्दुःखं सकलाभिर्विह्वला भवं भवाय प्रतिष्ठरुषं रुषा प्रधक्ष्यतीव वेपथुः
ज्ञातो वेपथुः ॥ २ ॥ ततो विनिःश्वस्य सती विहाय तं शोकेन वेगेन च दूयता हृदा ॥ पितोरगासेन परिप्लुत
धीर्गृहान्प्रयाणाय मनो यदार्थमदात्सती प्रियः ॥ ३ ॥ तामन्वगच्छन्नुत विक्रमंतीं ॥ एकादशैवानुचराः स
हस्रशः ॥ सपार्षदा लाममिमन्मदादयः ॥ पुरोवृषेंद्रास्तरसागतव्यथाः ॥ ४ ॥ तां शारिकाकंदुकदर्पणां
बुजैः ॥ श्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटैर्किलाययुः ॥ ५

विहाय मित्रोर्गृहाणि गतं कथंभूतायः प्रीयतस्येष्टं आत्मनो देहस्यार्थमदात् ॥ त्यागो देहः स्त्रैणं स्त्रीस्वभावः तेन वि
मूढा धीर्यस्याः सा ॥ ३ ॥ तुत विक्रमंतीं अग्रे गच्छंतीं सहपार्षदैः यदैश्वर्यवर्तमानाः मणिमान्मदश्च आदिर्येषां ते पुरः
पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयाः रुद्रातिक्रमेण तस्य गमनादागता व्यथा इति वा ॥ ४ ॥ तां वृषेंद्रमारोप्य शारि
कादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः सह विटैः किलाः क्रोधिता ययुः ॥ शारिकायवनिह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आसंतनायोवेदघोषः तेनोर्जितंशोभमानंयज्ञसंवेधिषश्चविशामेनंयस्मिन्॥ यद्धातेनोर्जितमतिशायितंयज्ञवै
शसंपरस्परंस्पर्धायस्मिन्नृतपजनंयज्ञस्थानंसमाविशद्देवी॥ विबुधैश्चजुष्टंस्वदादिभिः॥ निसृष्टानिनिर्मितानिभांडा
निपात्राणियस्मिन्॥ ८॥ कश्चनानादियतनाहृतवान्॥ यज्ञकृतादत्तात्॥ यद्वयंतस्मात्॥ तत्रहेतुः तेनविसानिनो
स्वसृजेननीचऋतेविना॥ तास्तुसादराःपरिषस्वजुः॥ आलिंगितवत्यर्थः॥ प्रेमास्रुभिर्निरुद्धः कंठोयासां ७

आवृत्यघोषोर्जितयज्ञवैशसंविप्रर्षिजुष्टंविबुधैश्चसर्वशः॥ सहार्वयःकांचनदर्भचर्मभिर्निसृष्टभांड
यजनंसमाविशत्॥ ८॥ तामागतांतत्रनकश्चिनादियत्॥ हिमानितांयज्ञकृतोभयाजनः॥ ऋतेस्वसृवै ८॥
तेनीचसादराः॥ प्रेमास्रुकंठाःपरिषस्वजुर्मुदा॥ ९॥ सौंदर्यसंप्रश्नसमर्थवार्तया॥ मात्राचमात्रध
स्रशिश्वसादरं॥ दत्तासपर्यावरमासनंचसानादात्पिताप्रतिनंदितासती॥ ८॥ अरुद्भागंतमवेक्ष्यचा
भ्रुवं॥ पित्राचदेवेकृतहेलनंदिभो॥ अनाहृतायज्ञसदस्यधीश्वरी॥ कुकोपलोकानिवधक्ष्यतीरु
षा॥ ९॥ जगर्हचामर्षविपन्नयागिरा॥ शिवद्विषंधूमपथश्रमस्मयं॥ स्वतेजसाभूतगणान्समुत्थि
तान्॥ निगृह्यदेवीजगतोभिशृण्वतः॥ १०॥ ९॥

अप्रतिनंदितां॥ अनाहूतामतीनादजनगृहीतवती॥ कथं॥ सौंदर्येणासोदरत्वेनभगिनीनांयःसंप्रश्नः॥ तत्रसम
र्थ्योगुणापावतीतिपासहतोचनादत्तनाशृणोदित्यर्थः॥ ८॥ नविद्यतेरुद्रस्यभागोयस्मिन्नृतदेवैरुद्रेकृतंहेलनं
अवज्ञानंआहूतायज्ञकरणात्॥ ९॥ जगर्हनिंदितवतीअमर्षेणाकोपेनविपन्नाअयक्ताक्षयाशिवंद्वेष्टीतिशिवद्वि
ट्तेधूमपथः॥ कर्ममार्गः तत्रश्रमःश्रम्यासः॥ तेनस्मयोगर्वोयस्यदक्षवधायसमुत्थितेस्वात्मयानिगृह्यनिवा
र्य॥ १०॥ २॥ ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाच टी ०

निंदामेवाहंनयस्येतित्रयोदशभिः ॥ मुक्तवैरकीर्यमकविरोधेतस्मिन्प्रियेभवंते अन्येविनावातमः प्रतीपयेतप्रति
कूलमाचरेत ॥ वैराभावेहेतवः यस्मालोकेतिशायनः अतिशायितोनास्तिनयाप्रियश्चाप्रियश्चनास्ति ॥ समासपाठेअ
तिशायेनप्रियोनास्तिदेहभृतांप्रियोयआत्मानस्यसमस्तस्यात्मविकारपाभूतेषुसमस्तरूपइतिवा ॥२॥ नस्यवप्रतिकूला
कारणंद्वेयामहत्तमद्रोहेणामाद्वात्रद्रोहेणाचतत्पुरुषाणांचानुविधेयंवदंतीमहत्तमद्रोहदोषानितिद्वाभ्यां ॥ ह
द्विजेसंयितेपःभवादृशाःतद्विधाःअसूयकाःएवमागमेषुदोषान्वेवगृह्णंति ॥ नतद्गुणानकेचित्तस्यास्ति
गोद्रोषान्गृह्णंति ॥ किंतुयद्यास्थितान्गुणान्दोषान्दिवेकेवगृह्णंतितेषुमहानउच्यते ॥ साधवस्तुकेवलंगु

श्रीदेवी ॥ नयस्यलोकेस्यतिशायनःप्रियःनयापियोदेहभृतांप्रियात्मनः ॥ तस्मिन्समस्तात्मनिमुक्तवै
रकेऋतेभवंतंकतमःप्रतीपयेत् ॥ ११ ॥ दोषान्परेषांद्विजगोषुसाधवोगृह्णंतिकेचिन्नभवादृशोद्विज
गुणांश्चफल्गूनबहुलीकरिष्यतोमहत्तमस्तेषुविदन्नवानयं ॥ १२ ॥ नाश्चर्यमेतद्यदसन्महत्तमसर्वदामह
द्विनिंदाकरणपात्मवादिषु ॥ मेर्यंमहापूरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनम् ॥ १३ ॥

णानेवगृह्णंतिनदोषानतेनमहत्तराउच्यंते ॥ महत्तमास्तदोषान्नगृह्णंतिप्रत्युतफल्गूनतद्गुणान् ॥ अपिगुणान्ब
हुलीकरिष्यतोभवंतितेषुभवान्अद्यमविदन्नविदितवान्कलितवानित्यर्थः ॥ तत्रहेतुमाह ॥ नाश्चर्यमेतद्यदसन्महत्तमस
र्वदामहद्विनिंदाकरणपात्मवादिषु ॥ १२ ॥ एतच्चदुर्जनेषुयुक्तमेवेत्याहनेति ॥ करणपंजडंशरीरंतद्देवात्मेतिवदंतियेतेषु ॥ ईर्ष्या
अतांतिः ॥ मेर्यंयस्याभवतोवमहतांविनिंदेतियदेतदाश्चर्यंनभवतिमेर्यंनिरस्ततेजःप्रभावोयेषामितिवायद्य
पिमहापुरुषाःस्वनिंदासहंतेतथापितमादरेणवः ॥ तदसहमानाःतपोजोमिनिरस्यतिश्रुतोशक्रप्रमहत्रिदनमे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नटेवंमहद्दोहमुक्तानस्मिन्नेवकृतदोहमाह॥ यदिति द्वाभ्यां यद्यस्य यदस्मान्नेशिव इति तस्य सिद्धं नामन्तरणां सर्वेषामाशु
सर्वमिच्छं हंतिकेवलं गिरेवेति तं उच्चारितं नतमनः स्वकं तत्समकृदपि प्रसंगादपि तं शिवं द्वेष्टि॥ न लंघ्यं शासनमाज्ञाय
स्य अहो शिवे तरः अमंगलरूपः॥ ४॥ यापहं तत्तमुक्तं भक्तिमुक्तिप्रदत्वेन शिवं वर्णयन्नाह॥ यस्य पादपद्मं मनोस्मवा
ल ब्रह्मासः ब्रह्मानंदः॥ सएवासवोमकरंदः तदर्थिभिः यज्ञार्थिनः सकामस्य लोकस्य ता आशिषो वर्षति
यद्वंशावापदेशोस्य शिव इति॥ यज्ञोक्तेप्रेतवासेस्थित्यादितदाप्तिपेमाह॥ किंवेति योजटा अवकीर्य श्मशाने अवस

यद्यत्तरं नामगिरेरितं नृणां सकृत्संगादघसाशु हंति तत्॥ पवित्रकीर्तिं तमलंघ्यशासनं भवान्न हो द्वे
ष्टि शिवं शिवेतरः॥ ५॥ यत्पादपद्मं मनोलिभिर्ब्रह्मानंदासवार्थिभिः॥ लोकस्य यद्वर्षति
वाशिषोर्थिनः॥ तस्मै भवान्द्रुह्यति विश्वबंधवे॥ ५॥ किंवाशिवाल्यं शिवं न विद्वस्तदंघ्रिब्रह्मादयस्त
मवकीर्य जटाः श्मशाने॥ तेनाल्पभस्मदृक्पालवसत्तिभूतां चैर्यमूर्ध्नि दधतिं तच्चरणावसृष्टं ६
कौर्णापियायनिरयाय दकल्पदेहा॥ यर्मीवितयं स्थगिभिन्दिभिरस्यमाने॥ छिंद्यात्स सस्यरुषतीमसा
तीप्रभश्चे॥ जिह्वामसूनपितनोविसृजेत्स यर्मः॥ ७॥ ॥

तवसति स्मतस्य पुमश्मानस्य मात्मानि भस्मानि दृक्पालानि च भूषणानि दधति यस्य तत्तेनात्मेन विद्वः किंवदंत्येव
तिचेत्तत्र तत्रासतिते षां तद्वाक्यं ब्रह्मणो ब्रह्मपत्नेरित्याह॥ तच्चरणादवसृष्टं गलितं विभ्रति मूर्ध्नि धारयंति ते॥ ६॥ इदा
नीं देहं त्यक्तुकामो धर्मं तत्रमाधर्मं तत्रमाह कर्णावटाद्यनिरोहत॥ यद्यपि मर्तं मारयितुं वा कल्पो न भवति॥ क
दाधर्मो वितथ्यं मरदा कर्ई शोस्यामिति अस्थगिभिर्विकुशैर्न्दिभिरस्यमाने अधिदिष्यमाने प्रभुः पक्तिः चेत्तरुषती
मकल्याणीवादिं तीप्रसस्य बलात्॥ छिंद्यात्तत्तोपि स्वयं प्राणान्विसृजेदिति यत्स यर्मः॥ ७॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तवत्वत्तुत्यत्वंशितिकंठीनीलकंठः॥ तत्रिंदकावमुक्तमात्रात्मत्रस्यापदिवस्यमार्गविनानमुद्धिरितिदृष्टांतेनाह॥ ज
यथस्यमोहादिविमुद्धिसंधसोजुगुप्सित
स्योद्धरणंप्रचक्षते॥१८॥ नवेदवादानुवर्तनेमतिःस्वएवलोकेरमतेमहामुनेः॥ यथागतिर्देवमनुष्य
योःपृथक्॥ सएवधर्मेनपरंतिपेतस्थितः॥१९॥ कर्मप्रवृत्तंचनिवृत्तमप्रतंवेदेविविच्योभयलिंगमा
श्रितं॥ विरोधितयोगपदेकर्तरिद्वयंतयावस्थाणिकर्मनर्छति॥ २० ॥ २॥

वेतिवाक्यः॥१९॥ एतदेवोपपादयत्याह॥ प्रवृत्तमग्निहोत्रादिनिवृत्तंशमदमादिकृतंसत्यमेवयतःवेदाश्रितं
विहितंतत्रविविच्यतत्रयवस्थायाश्रितं॥ अवस्थामेवाह॥ उभयंरागवैराग्यलक्षणालिंगचिह्नंमधिकारिवि
शेषणंयस्मिंस्तत्॥ ननुयावज्जीवमग्निहोत्रंजुहोतिशांतोदांतइत्यादिषुनैवंव्यवस्थाप्रतीयते॥ सत्यंतथापिअभ
योरेकाधिकारेविरोधात्तथापर्यवस्यतीत्याह॥ पुराणयज्ञादौयोगपदंयोगपदेनैकस्मिन्कर्तरितत्कर्मद्वयंवि
रोधिनचतर्हिनिवृत्तंकर्मशिवेनाधिकर्तव्यमेवेत्याह॥ ब्रह्मणासदाशिवेकिंचिदपिकर्मनर्छतिनप्राप्नोति॥ अ
तोयथाप्रवृत्तनिवृत्तयोःपरस्परधर्माकरणेनदोषः॥ नथ्वरेतदुभयधर्माकरणेयोतिभावः॥ २०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चिताभस्मकृतस्नानः तथा नग्नइत्यादिनायोभोगायभावउक्तः ॥ तत्राहहेपितः अस्मासिरास्थिताराश्रिताः यदव्यः अग्नि
मादिसमूहयः वः युष्माकं नसंतीत्यर्थः ॥ यतोवः पदव्योयज्ञशालास्वेवभवंति ॥ ताश्चतदत्रेनयज्ञगतेनात्रेनत्मैः
केवलमीडिताधूमवर्त्मभिश्चभुज्यंतेयाअस्मत्पदव्यः तास्तुनैवभूताः ॥ किंतुअव्यक्तलिंगाः अव्यक्तलिंगहेतुयासाइ
छामात्रप्रभवत्वात् ॥ अवधूतंब्रह्मविद्भिः सेविताः ॥ अतोहमाशोरुदोदरिद्रइतिरावंमाकुयाइतिभावः ॥ २ ॥ किं
चकुतोक्तेनइमंदेहंपदमात्रेत्याह ॥ नाम्नांएतेनबालस्यतेकिमपितलमेव ॥ कथंभूतेनकुजन्मनिदेवाह ॥ हरेकु

मावः पदव्यः पितरस्मदास्थितायज्ञशालास्वधूमवर्त्मभिः ॥ तदत्रत्मैरवभृद्भिरीडिताअव्यक्तलिं
गाअवधूतसेविताः ॥ ३ ॥ नैतेनदेहेनहरेकृतायासोदहोद्रवेनालमतः कुजन्मना ॥ व्रीडामसाभूत्कुज
नप्रसंगतः ॥ तज्जन्मधिग्योमहतामवद्यकृत् ॥ ४ ॥ मोघंनदीयंभगवान्नृषभुजोदायणीमाहयदा
सुहृन्मनाः ॥ व्यपेतनर्मस्मितमाशुतद्यहकुत्सत्यसंकल्पणपंतदंगजे ॥ ५ ॥ मैत्रेयउवाच ॥ इत्थंध्रुवेदल
मनृपशब्दहृत ॥ दिताउदीचींनिषसादशांतवाक् ॥ स्पृष्टाजलंपीतदुकूलसंवृतानिमीलदृग्योगपथं
समाविशत् ॥ ५ ॥

तायरूपस्यतवदेहाकृतेनवत्रास्योयंदेहः ॥ कथंमाजस्यतवाहकुजन्मनप्रसंगतः संबंधात्ममलजाभू
त ॥ अतः शोमहतामप्रियंकर्तातस्मायजन्मतद्धिकुत्सितंसंबंधादशाश्वमित्यर्थः ॥ ४ ॥ किंचपरिहासादिप्रविनोदेनो
पिदादायणीतिसंबोधयन् ॥ तदीयंतत्संबंधवाचकंयोजनामयदाहृत्यभुजाह ॥ गृहणातिमदाहृत्यथेतत्रमस्मि
तंयथाभवमेवंसुहृन्मनाअतिदुःखितचित्ताभवामि ॥ नतस्माद्विनिश्चितंएतत्कृपायाश्रयंयुक्तंदास्यदास्यामि ॥ ५
दत्तेप्रसउवाचकृत्वाशत्रुंहनकोधादिरिपुघातिन् ॥ उदीचीउदीच्यांदिशायांतांवीउदमुखीशांतवाक्गृहीतमौना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योगमार्गमिवाहकृत्वेति ॥ अनिलोप्राणापानौऊर्ध्वाधोहृत्कृकरौनिरोध्यसमानौनाभिचक्रेकृत्वाततऊदानमुत्थाप्यधिया
सहहृदिस्थापयित्वाकंठमार्गेणाभ्रुवोर्मध्यमनयत ॥ ५५ ॥ सहतामूर्जतयेन ॥ ५६ ॥ चरणाब्जेआसवेभक्तानानेदंभते
रपरेददर्श ॥ देहश्चसद्यःप्रचलितोभूत ॥ समाधिनाजातोयोग्निस्तेन ॥ ५७ ॥ एवंभुविचहाहेत्यादिवादः ॥ तमेवाह ॥ हं

कृत्वासमानावनिलौजितासनासोदानमुत्थाप्यचनाभिचक्रतः ॥ शनैर्हृदिस्थाप्यधियोरसिस्थितंकंठाद्भ्रु
वोर्मध्यमनिंदितांयत ॥ ५५ ॥ एवंस्वदेहंसहतोमहीयसामूर्जःसमारोपितमेकमादरात ॥ जिहासतोदे
हमुषामनस्विनोदेधारणांवेष्वनिलाग्नियारणिम् ॥ ५६ ॥ ततःस्वभर्तुःचरणाब्जासवंजराजुरोच्छ्रितयतो
नचापरे ॥ ददर्शदेहंतकल्मषस्मृतीसद्यःप्रजज्वालसमाधिजाग्निना ॥ ५७ ॥ तमप्यपतांखेभुविचाद्भुतम
हाहेतिवादःसुमहानजायत ॥ हंतप्रियादेवतमस्यदेवीजहावसून्केनसतीप्रकोपिता ॥ ५८ ॥ ब्रह्मात्म
नात्मंमहदस्यपश्यतप्रजापतेर्यस्यवशेचराचरंप्रजाः ॥ जहावसून्यद्धिमनात्मजासतीमनस्विनीमानमा
भीक्ष्णमर्हति ॥ ५९ ॥ सोयंदुर्मर्षहृदयोदक्षभ्रुकुटिलोकेपकीर्तिमहतीमवाप्स्यति ॥ यदंगजांस्वांपुरु
षद्विडुद्यतांनप्रत्यषेधन्कृतयेपराधतः ॥ ६० ॥ वदत्येवंजनेसत्याहृष्टास्तत्रायामरुत ॥ दत्तंतत्पार्षदाहे
तमुदतिष्ठन्नुदायुधाः ॥ ६१ ॥ तेषामापततांवेगंनिशम्यभगवान्भृगुः ॥ यज्ञघ्नेनयजुषादक्षिणाग्नौजुहा
वह ॥ ६२ ॥ मैत्रेयउवाच

तेतिविषादेदैवतमस्यपूज्यतमस्यप्रियाकेनददोणप्रकोपितासती ॥ ५८ ॥ महदात्मंदौर्जसंअस्यसर्वंजस्वेहएव
न्याय्यइत्याहुः ॥ तस्येतियेनविमनाअवज्ञाता ॥ ५९ ॥ दुर्मर्षमस्यसहनंहृदयंयस्यलोकेजनमप्येचशाहृत्रकिंचय
घतः ॥ स्वीयामराजांसतांअपराधतः ॥ स्वावज्ञयास्मृतयेमरणायोद्यतांनवारितवान् ॥ पुरुषद्विट्शिवद्वेषी
६० ॥ अद्भुतेदृष्टाच ॥ ६१ ॥ यज्ञघ्नोहंतीतियज्ञघ्नेनेन ॥ अपहतरेदाइत्यादिना ॥ ६२ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अध्वर्युणा भृगुणा ये तपसा सोमं प्राप्ताः ऋभवो नाम देवा उत्थिताः ॥ ३ ॥ ब्रह्मतेजसा उशद्भिर्दीप्यमानैः ॥ ४ ॥ इति च
तुर्थे चतुर्थः ॥ ४ ॥ पंचमे तु सती देहत्यागमाकर्ण्य शंकरः ॥ वीरभद्रं रुषोत्पन्नं ते तद्दक्षयज्ञनाशनं ॥ प्रजापतेर्हितोः
निःपतनं कृतः तेन सत्कृतायाः तस्याध्वरे ये ऋभवो देवाः ॥ ॥ सभूर्जटिः रुद्रः घोरः सन्नजस्मृत्कृतमुत्पाद्योत्थितः स
न्तो भुविविषसर्ज सुदृढगृहमुद्योयेन ॥ तडिता वह्नी नांचसदाः ज्वालाकृद्दृतुर्ध्वरोचिर्यस्यास्ता ॥ ७ ॥ ततो जटायाः स

पुराणघ

अध्वर्युणाहूयमाने देवा उत्तरोजसा ॥ ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ॥ ३ ॥ तेल्लाता पुथैः सर्वे प्रम
थाः सहगुह्यकाः ॥ हूयमानादेशोभेजुरुशद्भिर्ब्रह्मतेजसा ॥ ३४ ॥ इति श्रीभागवते चतुर्थस्कंधे सती देहो
त्सर्गो नाम चतुर्थोध्यायः ॥ ४ ॥ श्रीमैत्रेय उवाच ॥ भवो भवानीमाप्रियं प्रजापतेरसत्कृतायाः अवगम्य नारद
दात ॥ स्वपार्षदैस्तैः पंचतदध्वरर्भुभिर्विद्रावितं क्रोधकषायलोचनः ॥ ॥ क्रुद्धः सुदुष्प्रेक्षपुटः सभूर्जटिर्जटां घोरः
तडिद्वह्निसटोग्ररोचिषं ॥ उत्कृत्य रुद्रः सहसोत्थितो हसन्गंभीरनादो विसृजन्गणान्भुवि ॥ ७ ॥ ततो निकायस्त
३३ तथासृपादिवं ॥ सहस्रबाहुर्घनरुक्कुलाद्रिवत् ॥ कपालखट्वांगलसद्वरायुधः ॥ कपालमालीवि
विधोग्रतापुथः ॥ ३ ॥ तं किंकरा जातमीनं गृणंतमाहूय वज्रांजालं भयवान्वृतनाथः ॥ दृष्टे सयंतं जहि मद्भटा
नां तमग्रणी रुद्रभटं घ्नतोमे ॥ ४ ॥ ॥

काशात ॥ अतिकायो विरभद्रो जात इति शेषः ॥ ननु वात वा देहे तदिंद्रं स्पृशात ॥ अतुच्छ इत्यर्थः ॥ चतुरुक्कृष्णव
र्णः त्रय ॥ सूर्योऽवटशो वेत्राणि यस्य कराल्लाजं गार्द्धाग्रयस्य ज्वलदग्निरिव सूर्यजा यस्य कपालापुक्तः ॥ विविधाम
द्भुता नामुपानियस्य ॥ ३ ॥ हे रुद्र हे भटपुङ्ग कपालमङ्गदानां तमग्रणीः सन्नमयं दृष्टं जहि वह्नते जो दुर्जयमिति
मामस्याः यतस्तं मे प्रेषाकः ॥ ४ ॥ २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्युना रुद्रेण परिचक्रमे प्रदक्षिणीचकार ॥ प्रसंगस्य प्रतिघातं यत्न ॥ रंहो वेगः क्रोधः प्रोतात महीयसा बलीयसा
पिसहः सेहिस्सुबलसा ॥ ६ ॥ न गादनको मृत्युः तस्याप्येतकं मूलं घोषयति शारं कुर्वंतीति घोषणानि भूष
णानि भूषणानि ययोः तौ ॥ ७ ॥ ककुभि दिशि तमावमावति कितरजति जातिडः रजपतत्कुतो भूत
दयुः चिक्षेपामासुः हेतवः भवेनौ तानि कं कल्पयंति बाणा यति ॥ दक्षयज्ञस्य वेदिहेतः प्राचीनबर्हिः तदानीं ततो

प्राक्रुद्धेपवं कुपितेन मन्युना सदेवदेवं परिचक्रमे विभुं ॥ मेने तदात्मानमसंगमीश्वरं सा महीयसा तात सहः सहि
स्सु ॥ ९ ॥ प्रतीयमाना सतरुद्रपार्षदैर्भृगोर्नदद्भिर्व्यनदत्सुभैरवं ॥ उद्यम्य शूलं जगदंतकांतकं सप्राद्रवद्घोष
णभूषणाङ्घ्रिः ॥ १० ॥ अध्वर्यवो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुं ॥ तमः किमेतत्कुतएत
तद्रजो भूदितिद्विजा द्विजपत्न्यश्चदध्युः ॥ ११ ॥ वाता न वांति न हि संति दस्यवः ॥ प्राचीनबर्हिर्जीविति होप्र
दृश्यः ॥ गावो न कल्पंत इदं कुतो रजो ॥ लोको पुनः किं प्रलयाय कल्पते ॥ १२ ॥ प्रसूतिमिश्राः स्त्रियइद्विग्नचि
ता ॥ ऊचुर्विपाको वृजिनस्य पतस्य ॥ यत्पत्यपत्नीनां दुहितॄणां प्रजेशाः सुतां सतीमवदन्यावनागा ॥ १३ ॥
यस्तत्कालेऽग्रजटाकलापः ॥ सप्तस्तु अर्पितदिग्गजेंद्रः ॥ वितत्य नृत्यन्मुदितास्तदोर्ध्वजानुच्चाटहा
सस्तनयित्नुभिन्नदिक् ॥ १४ ॥

जानीवृतिन कल्पंते न शीघ्रं वी
र्यते ॥ १५ ॥ प्रसूतिर्दक्षपत्नीसापि आमुष्य पाप्मा विपा
कः ॥ फलप्रसूपत्नीनामिति तस्याः स्वायिको हेतुः ॥ अवदध्यौ अवज्ञातवान् ॥ अनागा मनागसं ॥ ५ ॥ नचेदं सुता
वतामात्रं किंतु रुद्रावज्ञानेऽप्रतोनास्य रुद्रं भविष्यतीत्याहुः ॥ यस्मिन्निति द्वाभ्यां गुणो विधकीर्णजटाकलापो यस्य
स्वशीलस्य ग्रेरर्पिताः ॥ प्रेतादिगुजेंद्रा यस्य ॥ ७ ॥ तामुर्वीमिताः प्रस्थाणाये ... दोषो बाहवपवधजाः तानितस्ह
गानृत्यत्सचे ॥ प्रहासः कठोरो हासपवस्तनयित्नुगर्जितं तेन भिन्नाविदीर्णा दिशो येन सः ॥ १० ॥ ११ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अमर्षयिता असहनमुक्तं कृतमस्य स्तुतं क्रोधयामास उदस्तः ॥ उत्थितो भागणो नक्षत्रं चोपेन पुनश्च तं कोपयतो वि
ष्णुरपि किं स्थितिस्यात ॥ तस्यादेवकाम्यस्य कथा ॥ ॥ उद्दिश्याप्रचलितादृष्टस्य जनेन वक्रयथा भवेत्वमुक्तमा
सतिउत्पाततमाः महोत्पाताउत्थिताः पर्यकुर्वतश्च कथं भूता महात्मानोपि दृष्टस्य भयावहाः ॥ ॥ नाना आपुथा
निधेषां वामनकैरुद्धैः कुचतापुथैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोद्दामानवैचेयपांतैः ॥ परितोयावद्भिर

अमर्षयितातमसह्यतेजसंमन्युलुतेउर्विसहं भ्रुकुट्या ॥ करालेष्वभिरुद्धभागणोस्यात्त्वहि किं कोपय
यतोविधातः ॥ ॥ वक्रेवमुद्धिवमुद्धशोच्यमाने ॥ जनेनदृष्टस्य मतिर्महात्मनः ॥ उत्पेदुरुत्पाततमाः सहस्रशो
भयावहादिविभुमोचपर्यकु ॥ ॥ तावत्सरुद्रानुचरैर्मानो महद्भिरापुथैर्वामनकैरुदापुथैः पिंगैः
पिशंगैर्भकरोदरानतैः ॥ पर्यद्रवद्भिर्विदारितकंधरैः ॥ केचिद्विभेजुः प्राग्वंशपत्नीशालातथापरे स
दृष्ट्वाग्निप्रशालांचतद्विहारंमहानसं ॥ ॥ कुरुजुर्यज्ञपात्राणितथैकेशीनवाससा ॥ कुंडेषुमूत्रयंके
चिद्विभिदुर्वेदिमोवलाः ॥ ॥ अवार्यमुनीनवपकेपत्नीसंतर्जयन ॥ आपरेजगृहुर्देवान्यपासन्नान्पला
यितान ॥ ॥ भृगुर्वेयसणिप्रवीरभद्रः प्रजापतिं ॥ चेष्टेशः पूषणं देवं भगंनंदीश्वरोग्रहीत ॥ ॥ सर्व
एवर्त्विजोदृष्टासदस्याः सदिवौकसः ॥ तेर्द्यमानाः सभृगवो विभिन्नैकथादृषत ॥ ॥ जुह्वतः स्रुवहस्तस्य
श्मश्रूणिभगवान्भवः ॥ भृगोर्लुलुंचेसदसियोकस्तस्य बलमुद्दर्दयत ॥ ॥ ॥

वरवरुद्धः ॥ ॥ यज्ञशालायाः पूर्वपश्चिमस्तंभयोः ॥ अग्निमंथनेपूर्वस्मिन्नाग्नीध्रकाष्ठे पाग्वंशः ॥ तेयज्ञशालायाः पश्चि
मतः पत्नीशालायज्ञशालायाः पुरतः स्थितेसदोमंडपसदसः ॥ पुरतोहविर्धानं तस्योत्तरतः ॥ अग्नीध्रशालायांत
द्विहारं यजमानगृहं महानसं पाकभोजनाशाला ॥ ॥ कुरुजुः वभजुः उत्तरेद्यामेवलासीमामूत्रयाणि ॥ ॥ ॥
आवभिरर्यमाना नेकधा अनेकधा उडुवुः ॥ ॥ स्रुवाहस्तेयस्य भवो वीरभद्रः लुलुचे उत्पाटितवान् ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उज्जहारउद्धृतवान्सदस्यः सभायाबुभियतः सन्दर्शनेनिषाबनिरंकुर्वंतंदक्षं प्रोक्तानिकोचुनेअब्रूचदतप्रेरितवान्
कलिंगाटेशराजस्यानिकुंहेहाहेवल्लभट्टोयथासुतेदत्तास्यानितवान्। यारिसतिपुरुतेरुद्रनिंद्यमानेदतः दंतान्दर्श
यन्वर्षज्जहासपस्तोरितिपाठेहिबचनसंद्रापोत्सम्पुरुषंवनेयत्रतत्रस्थितस्यापिपस्तोरिनप्राप्यर्थंसूचितवान्न
थाहिएषाप्रपिष्टभागोदंतकोहितंदेवाअत्रुवन्निति विहितस्यपोषणास्मद्विहेवत्याभावात् नत्रतस्यदतः सतीतिवक्त

भगस्यनेत्रेभगवान्पातितस्यहुयाभवि॥ उज्जहारसदःस्थोत्थायःप्राप्तनमसूसुचत्॥२॥पूस्त्रश्चाप
तियदंताक लिंगस्यथावलः॥ शाप्यमाणोरिभिर्मणैर्पादसदर्शयन्नृतः॥२२॥आक्रम्योरसिदत्तस्यशित
धारेणाहतेतिना॥ छिंदन्नपितनुहर्तुंनाशक्नोत्वंदकस्तदा॥२३॥शस्त्रैरस्त्रातितैरेनमानिभिन्नत्वचंहरः॥ विस्म
यंपरमापन्नोदध्यौपशुपतिश्चिरं॥२३॥दृष्ट्वासंतपनंयोगापशूनांसपतिर्भवे॥ यजमानपशोकस्यका
यातेनाहरच्छिरः॥२४॥साधुवादस्तदातेषांकर्मतत्रस्यशंसतां॥ भूतप्रेतपिशाचानांअन्येषांतद्विपर्ययः
२५॥ जहावेतच्छिरस्तस्यदक्षिणाग्नावसंचितः॥ तद्देवयजनंदग्ध्वाप्रतिष्ठहुत्यकालयं॥२६॥इतिश्रीभा
गवतेचतुर्थस्कंधेदक्षयज्ञविध्वंसोनामपंचमोध्यायः॥२॥

ध्यस्यात्॥ नचैतत्संगच्छतइत्याहशंकयानत्रापस्यदंतपातोवस्थाभेदप्रवृत्तेनहिचवनंनत्रापते॥ अतएवपूस्त्रोनु
ग्रहंहेयावस्पतिपूषानुयजमानस्यदृष्टिभक्षयिष्यतीत्यर्थः॥२१॥ छिंदन्नपीत्यत्रोशारसाइत्यपरिव्यक्तीभविष्यति यं
वकोवीरभद्रः॥२२॥ अस्त्रास्त्रितैर्मंत्रसहितैर्नतिभिन्नात्वक्यस्यतथाभूतंदृष्टेतिशेषः॥२३॥ सएपशूनांपतिः भवेसंज्ञ
तंयोगंकरनिष्योऽनादिरूपंसारणोपात्रदृष्टातेनोपायनाहरत्॥२४॥ अन्येषांत्रालिगादीनांतद्विपर्ययः असाधुवादः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षष्ठेतु देवसंघेन सहगता भवविधिः ॥ सोतयामासदक्षादिजीविताद्यर्थसादरात् ॥ अथ देवगणाः स्वयंभुवेमवेद
यन्निति द्वितीयेतान्वयः ॥ मूलादिभिः ॥ ५ ॥ संछिन्नानि त्रुटितानि भिन्नानि विदीर्णानि अंगानि येषां सहस्रसंख्यैः स
ऐश्वर्यवर्तमानाः ॥ ६ ॥ कश्यदक्षमपेयतः तज्जयमाहुः ॥ विभुर्ब्रह्मा तेजीयसि अतितेजस्विनि पुरुषे कृतागसि सपि
सयं तत्र कृतागसावभूषणानामपराधं कर्तुमिच्छतां सातथा वभूषणानेषां हेमाद्यानभूषात्प्रायेणातिलोकोक्तिः

